श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे अष्टादशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे अष्टादशोऽध्यायः ॥

श्रीशुक उवाच
तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः
पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो
वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षा -
भिधानां परमेण समाधिना सन्निधाप्येदमभि -
गृणन्त उपधावन्ति ॥ 1 ॥

भद्रश्रवस ऊचुः
ओं नमो भगवते धर्मायात्मविशोधनाय नम इति ॥ 2 ॥

अहो विचित्रं भगवद्विचेष्टितं
    घ्नन्तं जनोऽयं हि मिषन्न पश्यति।
ध्यायन्नसद्यर्हि विकर्म सेवितुं
    निर्हृत्य पुत्रं पितरं जिजीविषति ॥ 3 ॥

वदन्ति विश्वं कवयः स्म नश्वरं
    पश्यन्ति चाध्यात्मविदो विपश्चितः।
तथापि मुह्यन्ति तवाज मायया
    सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥ 4 ॥

विश्वोद्भवस्थाननिरोधकर्म ते
    ह्यकर्तुरङ्गीकृतमप्यपावृतः।
युक्तं न चित्रं त्वयि कार्यकारणे
    सर्वात्मनि व्यतिरिक्ते च वस्तुतः॥ **5** ॥

वेदान् युगान्ते तमसा तिरस्कृतान्
    रसातलाद्यो नृतुरङ्गविग्रहः।
प्रत्याददे वै कवयेऽभियाचते
    तस्मै नमस्तेऽवितथेहिताय इति॥ **6** ॥

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते
तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये।
तद्दयितं रूपं महापुरुषगुणभाजनो महा -
भागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः
प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह
तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति॥ **7** ॥

ओं नमो भगवते नरसिंहाय नमस्तेजस्तेजसे
आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्
रन्धय रन्धय तमो ग्रस ग्रस ओं स्वाहा।
अभयमभयमात्मनि भूयिष्ठा ओं क्ष्रौम्॥ **8** ॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
    ध्यायन्तु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजतादधोक्षजे
    आवेश्यतां नो मतिरप्यहैतुकी॥ **9** ॥

मागारदारात्मजवित्तबन्धुषु
    सङ्गो यदि स्याद्भगवत्प्रियेषु नः।

यः प्राणवृत्त्या परितुष्ट आत्मवान्
सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः॥ 10॥

यत्सङ्गलब्धं निजवीर्यवैभवं
तीर्थं मुहुः संस्पृशतां हि मानसम्।
हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं
को वै न सेवेत मुकुन्दविक्रमम्॥ 11॥

यस्यास्ति भक्तिर्भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः।
हरावभक्तस्य कुतो महद्गुणा
मनोरथेनासति धावतो बहिः॥ 12॥

हरिर्हि साक्षाद्भगवान् शरीरिणा -
मात्मा झषाणामिव तोयमीप्सितम्।
हित्वा महांस्तं यदि सज्जते गृहे
तदा महत्त्वं वयसा दम्पतीनाम्॥ 13॥

तस्माद्रजोरागविषादमन्यु -
मानस्पृहाभयदैन्याधिमूलम्।
हित्वा गृहं संसृतिचक्रवालं
नृसिंहपादं भजताकुतोभयमिति॥ 14॥

केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः
प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां
तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसङ्ख्यानानां
यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजित -
मनसां विध्वस्ता व्यसवः संवत्सरान्ते
विनिपतन्ति॥ 15॥

अतीव सुललितगतिविलासविलसितरुचिरहासलेशाव -
लोकलीलया किञ्चिदुत्तम्भितसुन्दरभ्रूमण्डलसुभग -
वदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥ **16** ॥

तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा
देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपे -
ताहःसु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ **17** ॥

ओं ह्रां ह्रीं ह्रूं ओं नमो भगवते हृषीकेशाय
सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां
चित्तीनां चेतसां विशेषाणां चाधिपतये
षोडशकलायच्छन्दोमयायान्नमयायामृतमयाय
सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय
नमस्ते उभयत्र भूयात् ॥ **18** ॥

स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो
　　ह्याराध्य लोके पतिमाशासतेऽन्यम् ।
तासां न ते वै परिपान्त्यपत्यं
　　प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥ **19** ॥

स वै पतिः स्यादकुतोभयः स्वयं
　　समन्ततः पाति भयातुरं जनम् ।
स एक एवेतरथा मिथो भयं
　　नैवात्मलाभादधि मन्यते परम् ॥ **20** ॥

या तस्य ते पादसरोरुहार्हणं
　　निकामयेत्साखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोऽर्चितो
　　यद्भग्नयाच्ञा भगवन् प्रतप्यते ॥ **21** ॥

मत्प्राप्तयेऽजेशसुरासुरादय -
स्तप्यन्त उग्रं तप ऐन्द्रियेधियः।
ऋते भवत्पादपरायणान्न मां
विन्दन्त्यहं त्वद्धृदया यतोऽजित ॥ 22 ॥

स त्वं ममाप्यच्युत शीर्ष्णि वन्दितं
कराम्बुजं यत्त्वदधायि सात्वताम्।
बिभर्षि मां लक्ष्म वरेण्य मायया
क ईश्वरस्येहितमूहितुं विभुरिति ॥ 23 ॥

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं
तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि
महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ 24 ॥

ओं नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणा -
यौजसे सहसे बलाय महामत्स्याय नम इति ॥ 25 ॥

अन्तर्बहिश्चाखिललोकपालकै -
रदृष्टरूपो विचरस्युरुस्वनः।
स ईश्वरस्त्वं य इदं वशेऽनय -
न्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥ 26 ॥

यं लोकपालाः किल मत्सरज्वरा
हित्वा यतन्तोऽपि पृथक् समेत्य च।
पातुं न शेकुर्द्विपदश्चतुष्पदः
सरीसृपं स्थाणु यदत्र दृश्यते ॥ 27 ॥

भवान् युगान्तार्णव ऊर्मिमालिनि
क्षोणीमिमामोषधिवीरुधां निधिम्।

मया सहोरु क्रमतेऽज ओजसा
तस्मै जगत्प्राणगणात्मने नम इति ॥ 28 ॥

हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं
बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह
वर्षपुरुषैः पितृगणाधिपतिरुपधावति
मन्त्रमिमं चानुजपति ॥ 29 ॥

ओं नमो भगवते अकूपाराय सर्वसत्त्वगुण -
विशेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे
नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ॥ 30 ॥

यद्रूपमेतन्निजमाययार्पित -
मर्थस्वरूपं बहुरूपरूपितम्।
सङ्ख्या न यस्यास्त्ययथोपलम्भनात्
तस्मै नमस्तेऽव्यपदेशरूपिणे ॥ 31 ॥

जरायुजं स्वेदजमण्डजोद्भिदं
चराचरं देवर्षिपितृभूतमैन्द्रियम्।
द्यौः खं क्षितिः शैलसरित्समुद्र -
द्वीपग्रहर्क्षेत्यभिधेय एकः ॥ 32 ॥

यस्मिन्नसङ्ख्येयविशेषनाम -
रूपाकृतौ कविभिः कल्पितेयम्।
सङ्ख्या यया तत्त्वदृशापनीयते
तस्मै नमः साङ्ख्यनिदर्शनाय ते इति ॥ 33 ॥

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः
कृतवराहरूप आस्ते तं तु देवी हैषा भूः

सह कुरुभिरस्खलितभक्तियोगेनोपधावति
इमां च परमामुपनिषदमावर्तयति ॥ **34** ॥

ओं नमो भगवते मन्त्रतत्त्वलिङ्गाय
यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय
नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ **35** ॥

यस्य स्वरूपं कवयो विपश्चितो
गुणेषु दारुष्विव जातवेदसम्।
मथ्नन्ति मथ्ना मनसा दिदृक्षवो
गूढं क्रियार्थैर्नम ईरितात्मने ॥ **36** ॥

द्रव्यक्रियाहेत्वयनेशकर्तृभि -
र्मायागुणैर्वस्तुनिरीक्षितात्मने।
अन्वीक्षयाङ्गातिशयात्मबुद्धिभि -
र्निरस्तमायाकृतये नमो नमः ॥ **37** ॥

करोति विश्वस्थितिसंयमोदयं
यस्येप्सितं नेप्सितमीक्षितुर्गुणैः।
माया यथायो भ्रमते तदाश्रयं
ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ **38** ॥

प्रमथ्य दैत्यं प्रतिवारणं मृधे
यो मां रसाया जगदादिसूकरः।
कृत्वाग्रदंष्ट्रे निरगादुदन्वतः
क्रीडन्निवेभः प्रणतास्मि तं विभुमिति ॥ **39** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे भुवनकोशवर्णनं नाम अष्टादशोऽध्यायः ॥